# મૃત્યુઞ્જય માનસ પૂજા સ્તોત્રમ

## Mrutyunjaya Maanasa Puja Stotram

---

મૃત્યુઞ્જયમાનસપૂજાસ્તોત્રમ ।

કૈલાસે કમનીયરત્નખચિતે કલ્પદ્રુમૂલે સ્થિતં
કર્પૂરસ્ફટિકેન્દુસુન્દરતનું કાત્યાયનીસેવિતમ ।
ગઙ્ગાતુઙ્ગતરઙ્ગરઞ્જિત જટાભારં કૃપાસાગરં
કણ્ઠાલઙ્કૃતશેષભૂષણમમું મૃત્યુઞ્જયં ભાવયે ।।૧।।

આગત્ય મૃત્યુઞ્જય ચન્દ્રમૌલે વ્યાઘ્રાજિનાલઙ્કૃત શૂલપાણે ।
સ્વભક્તસંરક્ષણકામધેનો પ્રસીદ વિશ્વેશ્વર પાર્વતીશ ।।૨।।

ભાસ્વન્મૌક્તિકતોરણે મરકતસ્તમ્ભાયુતાલઙ્કૃતે
સૌધે ધૂપસુવાસિતે મણિમયે માણિક્યદીપાઞ્ચિતે ।
બ્રહ્મેન્દ્રામરયોગિપુઙ્ગવગણૈર્યુક્તે ચ કલ્પદ્રુમૈઃ
શ્રીમૃત્યુઞ્જય સુસ્થિરો ભવ વિભો માણિક્યસિંહાસને ।।૩।।

મન્દારમલ્લીકરવીરમાધવીપુન્નાગનીલોત્પલચમ્પકાન્વિતૈઃ ।
કર્પૂરપાટીરસુવાસિતૈર્જલૈરાધત્સ્વ મૃત્યુઞ્જય પાદ્યમુત્તમમ ।।૪।।

સુગન્ધપુષ્પપ્રકરૈઃ સુવાસિતૈર્વિયન્નદીશીતળવારિભિઃ શુભૈઃ ।
ત્રિલોકનાથાર્તિહરાર્ઘ્યમાદરાદ્ગૃહાણ મૃત્યુઞ્જય સર્વવન્દિત ।।૫।।

હિમામ્બુવાસિતૈસ્તોયૈઃ શીતળૈરતિપાવનૈઃ ।
મૃત્યુઞ્જય મહાદેવ શુદ્ધાચમનમાચર ।।૬।।

ગુડદધિસહિતં મધુપ્રકીર્ણં સુઘૃતસમન્વિતધેનુદુગ્ધયુક્તમ ।
શુભકર મધુપર્કમાહર ત્વં ત્રિનયન મૃત્યુહર ત્રિલોકવન્દ્ય ।।૭।।

પઞ્ચાસ્ત્ર શાન્ત પઞ્ચાસ્ય પઞ્ચપાતકસંહર ।
પઞ્ચામૃતસ્નાનમિદં કુરુ મૃત્યુઞ્જય પ્રભો।।૮।

જગત્રયીખ્યાતસમસ્તતીર્થસમાહૃતૈઃ કલ્મષહારિભિશ્ચ ।
સ્નાનં સુતોયૈઃ સમુદાચર ત્વં મૃત્યુઞ્જયાનન્તગુણાભિરામ ।।૯।।

આનીતેનાતિશુભ્રેણ કૌશેયેનામરદ્રુમાત ।
માર્જયામિ જટાભારં શિવ મૃત્યુઞ્જય પ્રભો ।।૧૦।।

નાનાહેમવિચિત્રાણિ ચરિચીનામ્બરાણિ ચ
વિવિધાનિ ચ દિવ્યાનિ મૃત્યુઞ્જય સુધારય ||૧૧||

વિશુદ્ધમુક્તાફલજાલરમ્યં મનોહરં કાઞ્ચનહેમસૂત્રમ |
યજ્ઞોપવીતં પરમં પવિત્રમાધત્સ્વ મૃત્યુઞ્જય ભક્તિગમ્ય ||૧૨||

શ્રીગન્ધં ઘનસારકુઙ્કુમયુતં કસ્તૂરિકાપૂરિતં
કાલેયેન હિમામ્બુના વિરચિતં મન્દારસંવાસિતમ |

દિવ્યં દેવ મનોહરં મણિમયે પાત્રે સમારોપિતં
સર્વાઙ્ગેષુ વિલેપયામિ સતતં મૃત્યુઞ્જય શ્રીવિભો ||૧૩||

અક્ષતૈર્ધવળૈર્દિવ્યૈઃ સમ્યક્તિલસમન્વિતૈઃ |
મૃત્યુઞ્જય મહાદેવ પૂજયામિ વૃષધ્વજ ||૧૪||

ચમ્પકપઙ્કજકુન્દૈઃ કરવીરમલ્લિકાકુસુમૈઃ |
વિસ્તારય નિજમુકુટં મૃત્યુઞ્જય પુણ્ડરીકનયનાપ્ત ||૧૫||

માણિક્યપાદુકાદ્વન્દ્વે મૌનિહૃત્પદ્મમન્દિરે |
પાદૌ સત્પદ્મસદૃશૌ મૃત્યુઞ્જય નિવેશય ||૧૬||

માણિક્યકેયૂરકિરીટહારૈઃ કાઞ્ચીમણિસ્થાપિતકુડ્મલૈશ્ચ |
મઞ્જીરમુખ્યાભરણૈર્મનોજ્ઞૈરઙ્ગાનિ મૃત્યુઞ્જય ભૂષયામિ ||૧૭||

ગજવદન સ્કન્દધૃતેનાતિસ્વચ્છેન ચામરયુગેન |
ગલદલકાનનપદ્મં મૃત્યુઞ્જય ભાવયામિ હૃત્પદ્મે ||૧૮||

મુક્તાતપત્રં શશિકોટિશુભ્રં શુભપ્રદં કાઞ્ચન દણ્ડયુક્તમ |
માણિક્યસંસ્થાપિતહેમકુમ્ભં સુરેશમૃત્યુઞ્જય તેઽર્પયામિ ||૧૯||

મણિમુકુરે નિષ્પટલે ત્રિજગદ્ગાઢાન્ધકારસપ્તાશ્વે |
કન્દર્પકોટિસદૃશં મૃત્યુઞ્જય પશ્ય વદનમાત્મીયમ ||૨૦||

કર્પૂરચૂર્ણં કપિલાજ્યપૂતં દાસ્યામિ કાલેયસમન્વિતૈશ્ચ |
સમુદ્ભવં પાવનગન્ધધૂપિતં મૃત્યુઞ્જયાઙ્ગં પરિકલ્પયામિ ||૨૧||

વર્તિત્રયોપેતમખણ્ડદીપ્ત્યા તમોહરં બાહ્યમથાન્તરં ચ |
રાજ્યં સમસ્તામરવર્ગહૃદ્યં સુરેશમૃત્યુઞ્જય વંશદીપમ ||૨૨||

રાજાન્નં મધુરાન્વિતં ચ મૃદુળં માણિક્યપાત્રે સ્થિતં
હિઙ્ગૂજીરકસન્મરીચમિલિતઃ શાકૈરનેકૈઃ શુભૈઃ |
શાકં સમ્યગપૂપપૂપસહિતં સદ્યોઘૃતેનાપ્લુતં
શ્રીમૃત્યુઞ્જય પાર્વતીપ્રિય વિભો સાપોશનં ભુજ્યતામ ||૨૩||

કૂષ્માણ્ડવાર્તાકપટોલિકાનાં ફલાનિ રમ્યાણિ ચ કારવેલ્લ્યાઃ |
સુપાકયુક્તાનિ સસૌરભાણિ શ્રીકણ્ઠ મૃત્યુઞ્જય ભક્ષયેશ ||૨૪||

શીતળં મધુરં સ્વચ્છં પાવનં વાસિતં લઘુ |
મધ્યે સ્વીકુરુ પાનીયં શિવ મૃત્યુઞ્જય પ્રભો||૨૫||

શર્કરામિલિતં સ્નિગ્ધં દુગ્ધાન્નં ગોધૃતાન્વિતમ |
કદળીફલસંમિશ્રં ભુજ્યતાં મઋત્યુસંહર ||૨૬||

કેવલમતિમાધુર્યં દુગ્ધૈઃ સ્નિગ્ધૈશ્ચ શર્કરામિલિતૈઃ |
એલામરીચમિલિતં મૃત્યુઞ્જય દેવ ભુઙ્ક્ષ્વ પરમાન્નમ ||૨૭||

રમ્ભાચૂતકપિત્થકણ્ટકફલૈર્દ્રાક્ષારસસ્વાદુમત-
ખર્જૂરૈર્મધુરેક્ષુખણ્ડશકલૈઃ સન્નારિકેલામ્બુભિઃ |
કર્પૂરેણ સુવાસિતૈર્ગુડજલૈર્માધુર્યયુક્તૈર્વિભો
શ્રીમૃત્યુઞ્જય પૂરય ત્રિભુવનાધારં વિશાલોદરમ ||૨૮||

મનોજ્ઞરમ્ભાવનખણ્ડખણ્ડિતાન રુચિપ્રદાન્સર્ષપજીરકાંશ્ચ |
સસૌરભન્સૈન્ધવસેવિતાંશ્ચ ગૃહાણ મૃત્યુઞ્જય લોકવન્દ્ય ||૨૯||

હિઙ્ગૂજીરકસહિતં વિમલામલકં કપિત્થમતિમધુરમ |
બિસખણ્ડાંલ્લવણયુતાન્મૃત્યુઞ્જય તેઽર્પયામિ જગદીશ ||૩૦||

એલાશુણ્ઠીસહિતં દધ્યન્નં ચારુ હેમપાત્રસ્થમ |
અમૃતપ્રતિનિધિમાઢ્યં મૃત્યુઞ્જય ભુજ્યતાં ત્રિલોકેશ ||૩૧||

જમ્બીરનીરાઞ્ચિતશૃઙ્ગબેરં મનોહરાનમ્લશલાટુખણ્ડાન |
મૃદૂપદંશાન્સહિતોપભુઙ્ક્ષ્વ મૃત્યુઞ્જય શ્રીકરુણાસમુદ્ર ||૩૨||

નાગરરામઠયુક્તં સુલલિતજમ્બીરનીરસંપૂર્ણમ |
મથિતં સૈન્ધવસહિતં પિબ હર મૃત્યુઞ્જય ક્રતુધ્વંસિન ||૩૩

મન્દારહેમામ્બુજગન્ધયુક્તૈર્મન્દાકિનીનિર્મલપુણ્યતોયૈઃ |
ગૃહાણ મૃત્યુઞ્જય પૂર્ણકામ શ્રીમત્પરાપોશનમભ્રકેશ ||૩૪||

ગગનધુનીવિમલજલૈર્મૃત્યુઞ્જય પદ્મરાગપાત્રગતૈઃ |
મૃગમદચન્દનપૂર્ણં પ્રક્ષાળય ચારુહસ્તપદયુગ્મમ ||૩૫||

પુન્નાગમલ્લિકાકુન્દવાસિતૈર્જાહ્નવીજલૈઃ
મૃત્યુઞ્જય મહાદેવ પુનરાચમનં કુરુ ||૩૬||

મૌક્તિકચૂર્ણસમેતૈર્મૃગ મદઘનસારવાસિતૈઃ પૂગૈઃ |

પર્ણૈઃ સ્વર્ણસમાનૈર્મૃત્યુઞ્જય તેऽર્પયામિ તામ્બૂલમ ||૩૭||

નીરાજનં નિર્મલદીપ્તિમદ્ભિર્દીપાઙ્કુરૈરુજ્જવલમુચ્છ્રિતૈશ્ચ |
ઘણ્ટાનિનાદેન સમર્પયામિ મૃત્યુઞ્જયાય ત્રિપુરાન્તકાય || ૩૮||

વિરિઞ્ચિમુખ્યામરવૃન્દવન્દિતે સરોજમત્સ્યાઙ્કિતચક્રચિહ્નિતે |
દદામિ મૃત્યુઞ્જય પાદપઙ્કજે ફણીન્દ્રભૂષે પુનરર્ઘ્યમીશ્વર ||૩૯||

પુન્નાગનીલોત્પલકુન્દજાતીમન્દારમલ્લીકરવીરપઙ્કજૈઃ |
પુષ્પાઞ્જલિં બિલ્વદળૈસ્તુળસ્યા મૃત્યુઞ્જયાઙ્ઘ્રૌ વિનિવેશયામિ ||૪૦||

પદે પદે સર્વતમોનિકૃન્તનં પદે પદે સર્વશુભપ્રદાયકમ |
પ્રદક્ષિણં ભક્તિયુતેન ચેતસા કરોમિ મૃત્યુઞ્જય રક્ષ રક્ષ મામ ||૪૧||

નમો ગૌરીશાય સ્ફટિકધવળાઙ્ગાય ચ નમો નમો
લોકેશાય સ્તુતવિબુધલોકાય ચ નમઃ |
નમઃ શ્રીકણ્ઠાય ક્ષપિતપુરદૈત્યાય ચ નમો નમો
ભાલાક્ષાય સ્મરમદવિનાશાય ચ નમઃ ||૪૨||

સંસારે જનિતાપરોગસહિતે તાપત્રયાક્રન્દિતે
નિત્યં પુત્રકળત્રવિત્તવિલસત્પાશૈર્નિબદ્ધં દૃઢમ |
ગર્વાન્ધં બહુપાપવર્ગસહિતં કારુણ્યદૃષ્ટ્યા વિભો
શ્રીમૃત્યુઞ્જય પાર્વતીપ્રિય સદા માં પાહિ સર્વેશ્વર || ૪૩||

સૌધે રત્નમયે નવોત્પલદળાકીર્ણે ચ તલ્પાન્તરે
કૌશેયેન મનોહરેણ ધવળેનાચ્છાદિતે સર્વશઃ |
કર્પૂરાઞ્ચિતદીપદીપ્તિમિલિતે રમ્યોપધાનદ્વયે
પાર્વત્યાઃ કરપદ્મલાલિતપદં મૃત્યુઞ્જયં ભાવયે ||૪૪||

ચતુશ્ચત્વારિંશદ્વિલસદુપચારૈરભિમતૈર્મનઃપદ્મે
ભક્ત્યા બહિરપિ ચ પૂજાં શુભકરીમ કરોતિ પ્રત્યૂષે
નિશિ દિવસમધ્યેऽપિ ચ પુમાન્પ્રયાતિ
શ્રીમૃત્યુઞ્જયપદમનેકાદ્ભુતપદમ ||૪૫||

પ્રાતર્લિઙ્ગમુમાપતેરહરહઃ સન્દર્શનાત્સ્વર્ગદં
મધ્યાહ્ને હયમેધતુલ્યફલદં સાયન્તને મોક્ષદમ |
ભાનોરસ્તમયે પ્રદોષસમયે પઞ્ચાક્ષરારાધનં
તત્કાલત્રયતુલ્યમિષ્ટફલદં સદ્યોऽનવદ્યં દૃઢમ ||૪૬||

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય શ્રીમચ્છઙ્કરાચાર્યસ્ય

કૃતં શ્રીમૃત્યુઞ્જય માનસપૂજાસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**